# શ્રીદત્તસ્તોત્રમ્ ૬

Shri Datta Stotram 6

sanskritdocuments.org

December 8, 2018

# Shri Datta Stotram 6

# શ્રીદત્તસ્તોત્રમ્ ૬

## Sanskrit Document Information

Text title : Dattastotram 6

File name : dattastotram6.itx

Category : deities_misc, dattatreya

Location : doc_deities_misc

Author : Bhrigu Rishi

Proofread by : Sunder Hattangadi sunderh at hotmail.com

Description/comments : Dattatreya Stuti Manjari, Ed. S.V. Radhakrishnashastri

Acknowledge-Permission: Mahaperiaval Trust

Latest update : December 8, 2018

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

December 8, 2018

*sanskritdocuments.org*

Shri Datta Stotram 6

# શ્રીદત્તસ્તોત્રમ્ ૬

બાલાર્કપ્રભમિન્દ્રનીલજટિલં ભસ્માઙ્ગરાગોજ્વલં
 શાન્તં નાદવિલીનચિત્તપવનં શાર્દૂલચર્મામ્બરમ્ ।
બ્રહ્મજ્ઞૈઃ સનકાદિભિઃ પરિવૃતં સિદ્ધૈઃ સમારાધિતં
 આત્રેયં સમુપાસ્મહે હૃદિ મુદા ધ્યેયં સદા યોગિભિઃ ॥ ૧॥

દિગમ્બરં ભસ્મવિલેપિતાઙ્ગં ચક્રં ત્રિશૂલં ડમરું ગદાં ચ ।
પદ્માસનસ્થં શશિસૂર્યનેત્રં દત્તાત્રેયં ધ્યેયમભીષ્ટસિદ્ધ્યૈ ॥ ૨॥

ૐ નમઃ શ્રીગુરું દત્તં દત્તદેવં જગદ્ગુરુમ્ ।
નિષ્કલં નિર્ગુણં વન્દે દત્તાત્રેયં નમામ્યહમ્ ॥ ૩॥

બ્રહ્મ લોકેશ ભૂતેશ શઙ્ખચક્રગદાધરમ્ ।
પાણિપાત્રધરં દેવં દત્તાત્રેયં નમામ્યહમ્ ॥ ૪॥

સુરેશવન્દિતં દેવં ત્રૈલોક્ય લોકવન્દિતમ્ ।
હરિહરાત્મકં દેવં દત્તાત્રેયં નમામ્યહમ્ ॥ ૫॥

નિર્મલં નીલવર્ણં ચ સુન્દરં શ્યામશોભિતમ્ ।
સુલોચનં વિશાલાક્ષં દત્તાત્રેયં નમામ્યહમ્ ॥ ૬॥

ત્રિશૂલં ડમરું માલાં જટામુકુટમણ્ડિતમ્ ।
મણ્ડિતં કુણ્ડલં કર્ણે દત્તાત્રેયં નમામ્યહમ્ ॥ ૭॥

વિભૂતિભૂષિતદેહં હારકેયૂરશોભિતમ્ ।
અનન્તપ્રણવાકારં શ્રીદત્તાત્રેયં નમામ્યહમ્ ॥ ૮॥

પ્રસન્નવદનં દેવં ભુક્તિમુક્તિપ્રદાયકમ્ ।
જનાર્દનં જગત્ત્રાણં દત્તાત્રેયં નમામ્યહમ્ ॥ ૯॥

રાજરાજં મિતાચારં કાર્તવીર્યવરપ્રદમ્ ।
સુભદ્રં ભદ્રકલ્યાણં દત્તાત્રેયં નમામ્યહમ્ ॥ ૧૦॥

અનસૂયાપ્રિયકરં અત્રિપુત્રં સુરેશ્વરમ્ ।
વિખ્યાતયોગિનાં મોક્ષં દત્તાત્રેયં નમામ્યહમ્ ॥ ૧૧॥

દિગમ્બરતનું શ્રેષ્ઠં બ્રહ્મચર્યવ્રતે સ્થિતમ્ ।
હંસં હંસાત્મકં નિત્યં દત્તાત્રેયં નમામ્યહમ્ ॥ ૧૨॥

કદા યોગી કદા ભોગી બાલલીલાવિનોદકઃ ।
દશનૈઃ રત્નસઙ્કાશૈઃ દત્તાત્રેયં નમામ્યહમ્ ॥ ૧૩॥

ભૂતબાધા ભવત્રાસઃ ગ્રહપીડા તથૈવ ચ ।
દરિદ્રવ્યસનધ્વંસી દત્તાત્રેયં નમામ્યહમ્ ॥ ૧૪॥

ચતુર્દશ્યાં બુધે વારે જન્મમાર્ગશિરે શુભે ।
તારકં વિપુલં વન્દે દત્તાત્રેયં નમામ્યહમ્ ॥ ૧૫॥

રક્તોત્પલદલપાદં સર્વતીર્થે સમુદ્ભવમ્ ।
વન્દિતં યોગિભિઃ સર્વૈઃ દત્તાત્રેયં નમામ્યહમ્ ॥ ૧૬॥

જ્ઞાનદાતા પ્રભુઃ સાક્ષાદ્ભતિર્મોક્ષપ્રદાયકઃ ।
આત્મભૂરીશ્વરઃ કૃષ્ણઃ દત્તાત્રેયં નમામ્યહમ્ ॥ ૧૭॥

ભૃગુવિરચિતમિદં દત્તાત્રેય પારાયણાન્વિતમ્ ।
સાક્ષાદ્ધદ્ભત્સ્વયં બ્રહ્મા દત્તાત્રેયં નમામ્યહમ્ ॥ ૧૮॥

પ્રાણિનાં સર્વજન્તૂનાં કર્મપાશપ્રભઞ્જનમ્ ।
દત્તાત્રેયગુરુસ્તોત્રં સર્વાન્કામાનવાપ્નુયાત્ ॥ ૧૯॥

અપુત્રો લભતે પુત્રં ધનધાન્યસમન્વિતઃ ।
રાજમાન્યો ભવેલ્લક્ષ્મીં અપ્રાપ્યં પ્રાપ્નુયાત્ નરઃ ॥ ૨૦॥

ત્રિસન્ધ્યં જપમાનસ્તુ દત્તાત્રેયસ્તુતિં સદા ।
તસ્ય રોગભયં નાસ્તિ દીર્ઘાયુર્વિજયી ભવેત્ ॥ ૨૧॥

કૂષ્માણ્ડડાકિનીપક્ષપિશાચબ્રહ્મરાક્ષસાઃ ।
સ્તોત્રસ્ય શ્રુતમાત્રેણ ગચ્છન્ત્યત્ર ન સંશયઃ ॥ ૨૨॥

એતદ્વિંશતિશ્લોકાનાં આવૃત્તિં કુરુ વિંશતિમ્ ।
તસ્યાવૃત્તિસહસ્રેણ દર્શનં નાત્ર સંશયઃ ॥ ૨૩॥

ઇતિ શ્રીભૃગુવિરચિતં દત્તસ્તોત્રં સમ્પૂર્ણમ્ ॥

Proofread by Sunder Hattangadi sunderh at hotmail.com

*Shri Datta Stotram 6*

pdf was typeset on December 8, 2018

Please send corrections to *sanskrit@cheerful.com*